

# आनन्द
# ANAND

## बालवाटिका हेतु क्रियाकलाप पुस्तक

not to be republished

विद्याऽमृतमश्नुते

एन सी ई आर टी
NCERT

राष्ट्रीय शैक्षिक अनुसंधान और प्रशिक्षण परिषद्
NATIONAL COUNCIL OF EDUCATIONAL RESEARCH AND TRAINING

13246 – आनन्द — बालवाटिका हेतु क्रियाकलाप पुस्तक

ISBN 978-93-5292-403-5

**प्रथमं संस्करणम्**
*मार्च 2023 फाल्गुन 1944*

**PD 5T BS**

**© राष्ट्रियशैक्षिकानुसन्धानप्रशिक्षणपरिषद्, 2023**

**₹ 160.00**

*एनसीईआरटी जलचिह्नसहितं ८० जीएसएम पत्रे मुद्रितम्*

राष्ट्रीय शैक्षिका नुसन्धान प्रशिक्षण परिषदः श्री अरबिन्दो मार्ग, नवा दिल्ली 110 016 इत्यस्याः सचिवेन प्रकाशन प्रभाग प्रकाशितं तथा गीता ऑफसेट प्रिंटर (पी.) लिमिटेड, सी-90 एण्ड सी-86, ओखला औद्योगिक क्षेत्र फ़ेज़-1 नवादिल्ल्यां 110 020, मुद्रितम्।.

**सर्वे अधिकाराः सुरक्षिताः**

- अस्य प्रकाशनस्य कस्यापि भागस्य पुनरुत्पादनं, पुनःप्राप्तिप्रणाल्यां सङ्ग्रहणं वा -प्रसारणं वा, कस्यापि रूपेण वा , इलेक्ट्रॉनिक-यान्त्रिक-छायाप्रति- दृश्यश्रव्याङ्कनेन वा केनचित् साधनेन प्रकाशकस्य पूर्वानुमतिं विना न कर्तुं शक्यते।
- एतत् पुस्तकं अस्य समयस्य अधीनं विक्रीयते यत् व्यापाररूपेण प्रकाशकस्य सहमतिम् विना, यस्मिन् रूपेण बन्धने वा आवरणे वा प्रकाशितं, तस्मात् परं किमपि रूपेण भाटकप्रदानेन, पुनर्विक्रयणेन वा , न व्यवहरणीयम्।
- अस्य प्रकाशनस्य समीचीनमूल्यं अस्मिन् पृष्ठे मुद्रितं मूल्यं भवति, रबरमुद्रया वा चिटिकासंश्लेषेण वा अन्येन माध्यमेन वा सूचितं यत्किमपि संशोधितं मूल्यं भवेत् तद् अशुद्धं, अस्वीकार्यं च भवितुमर्हति।

**प्रकाशनप्रभागस्य कार्यालयाः, एनसीईआरटी**

एन सी ई आर टी परिसरः
श्री अरबिन्दो मार्गः
**नई दिल्ली 110 016** **फोन : 011-26562708**

108, 100 फीट मार्गः
होसदाकेरे हल्ली विस्तार
बनाशंकारी तृतीयचरणः
**बेंगलुरु 560 085** **फोन : 080-26725740**

नवजीवन न्यास भवनम्
पी.ओ. नवजीवनम्
**अहमदाबाद 380 014** **फोन : 079-27541446**

सीडब्ल्यूसी परिसर
Opp. धनकल बस स्टॉप
पाणिहति
**कोलकाता 700 114** **फोन : 033-25530454**

सीडब्ल्यूसी परिसर
मालिगांव
**गुवाहाटी 781 021** **फोन : 0361-2674869**

**प्रकाशनदलम्**

प्रमुखः, प्रकाशन प्रभागः : *अनूपकुमारराजपूतः*

प्रमुखनिर्माणाधिकारी : *अरुणचितकारः*

प्रमुखव्यवसायप्रबन्धकः : *विपिनदीवानः*

प्रमुखसम्पादकः (प्रभारी) : *बिज्ञानसुतारः*

निर्माणाधिकारी : *अतुलसक्सेनाः*

***मुखपृष्ठम्***
राजीवः पहूजाः

© NCERT not to be republished

# अहं तु यामि बालवाटिकाम्

अहं तु यामि बालवाटिकां,

सर्वे यामो बालवाटिकाम्,

बालवाटिकां, बालवाटिकां,
बालवाटिकां।

हो! हो! हो!




नास्ति स्यूतकम्,

पुस्तकानि नहि,

पुनः किमस्ति ?

सन्ति पृथक्-पृथक् क्रीडाः,

क्रीडायां पठनं भविष्यति।

एतादृशी नो बालवाटिका,

आनन्दमयीयं बालवाटिका।

बालवाटिका, बालवाटिका, बालवाटिका।

हो! हो! हो!

© NCERT not to be republished

© NCERT
not to be republished

# प्राक्कथन

सुनिर्दिष्टप्रक्रियायाः माध्यमेन बालानाम् गठनवर्षस्य पोषणस्य भारतस्य एका प्रसिद्धा परम्परा अस्ति, या हि *'संस्काराः'* इति पदेन बहुधा ज्ञायते। एकस्मात् वंशानुक्रमात् अन्यं वंशानुक्रमं प्रति प्रसारिताः एते *संस्काराः* बालजीवनस्य प्रथमाष्टवर्षेषु पर्याप्तपरिचर्यायाः मार्गं प्रशस्तं कुर्वन्ति, येन तेषां विकासस्य, व्यवहारस्य, क्षमतायाः च प्रत्येकं पक्षं परवर्तिषु वर्षेषु अनुकूलरूपेण आकारो भवेत्।

अस्य चरणस्य महत्त्वं दृष्ट्वा *राष्ट्रियशिक्षानीतिः (NEP) २०२०*, (३–८ वर्षाणां बालकानां) आधारभूतपञ्चवर्षं विद्यालयशिक्षायाः क्षेत्रे आनेतुं समुचितरूपेण अनुशंसति। कस्यचिद् व्यक्तेः आजीवनं शिक्षणं, सामाजिकं भावनात्मकं च व्यवहारं समग्रस्वास्थ्यं च अस्मिन् चरणे निर्भरं भवति। तदतिरिक्तं बालकानां संज्ञानात्मकक्षेत्रे साक्षरता, संख्याशास्त्रं, रचनात्मकसौन्दर्यसंवेदनानि च प्राप्तुं स्वस्य शारीरिक-क्रिया-कौशलस्य विकासाय अपि परिश्रमपूर्वकं समर्थनस्य आवश्यकता भवति। नीतिः अस्य चरणस्य कृते तादृश्याः *नन्यराष्ट्रीयपाठ्यक्रमरूपरेखायाः* अनुशंसां करोति, यया सम्पूर्णशिक्षाव्यवस्थायाः व्यापकरूपेण मार्गदर्शनं क्रियते, या न केवलं आधारभूतपदे उच्चगुणवत्तायुक्तशिक्षां प्रदातुं अपितु एतां गतिं विद्यालयशिक्षायाः अग्रिमपदेषु अग्रे नेतुम् अपि सक्षमा वर्त्तते।

*आधारभूतचरणस्य कृते राष्ट्रियपाठ्यक्रमरूपरेखा (NCF-FS)* प्रारम्भिकबाल्यकालस्य परिचर्यायाः शिक्षायाश्च भारतीयसंस्कृतेः लोकाचारस्य च मूलभूतताम् आनेतुं अनुशंसति। तदतिरिक्तं गृहे बालस्य अनुभवानां ज्ञानं, कौशलं, मनोवृत्तयः च एकीकृत्य अपि केन्द्रीभूय विद्यालयस्य परिसरे विकसिताः भविष्यन्ति। एतेन केवलं पुस्तकेभ्यः शिक्षणस्य प्रचलितव्यवस्थाम् अतिरिच्य मनोरोचकक्रीडा-मार्गेण योग्यताधारितायाः च शिक्षणव्यवस्थायाः प्रोन्नतेः सङ्केतः भवति, यस्यां बालाः यत् कुर्वन्ति, यत् शिक्षन्ति च तेन सह तेषां संलग्नता अधिका महत्त्वपूर्णा भवति।

अतः अस्याः अनुशंसायाः अनुसरणं कृत्वा आधारपदस्य पाठ्यक्रमः *कृष्णयजुर्वेदस्य तैत्तिरीयसंहितायां तैत्तिरीयोपनिषदि* स्पष्टीकृतस्य *पञ्चकोशीयविकासस्य* (मानवव्यक्तित्वस्य पञ्चस्तरीयविकासस्य) अवधारणात्मकमूलाधारेषु अवलम्बितः अस्ति। तत्र 'आत्मावबोधः' इति व्यक्तेः जीवनस्य परमलक्ष्यरूपेण प्राप्तुं सामर्थ्यं लभ्यते, येन भारतस्य पोषितसभ्यताप्रज्ञायाः व्यक्तेः समग्रविकासस्य समकालीनदृष्टिकोणेन सह सामञ्जस्यपूर्णं मिश्रणं सुनिश्चितं भवति।

अस्य प्रयासस्य सफलता स्पष्टतया तेषु उपायेषु निर्भरं भविष्यति, येषु *आंगनवाड़ी* इति केन्द्राणि, विद्यालयाः, सम्बन्धितसंस्थाः च अस्मिन् स्तरे बालकानां समुचितदक्षतां प्रतिस्पर्धितां च प्रोत्साहयितुं प्रयतिष्यन्ते। एतत् लक्ष्यं प्राप्तुं मुद्रितरूपेण अपि च ऑनलाइनरूपेण, अनुशंसितपाठ्यक्रमजालस्थलेषु उपलब्धानां विविधानां शिक्षणशिक्षणसामग्रीणां उपयोगः करणीयः, अभिभावकाः अपि *आंगनवाड़ीनां*, विद्यालयानां, सम्बन्धितसंस्थानां च सावधानतापूर्वकं मार्गदर्शनेन एवमेव कुर्वन्तु।

पाठ्यक्रमस्य परिकल्पकैः शिक्षणस्य पञ्चवर्षेषु क्रमेण परिष्करणीयानां भिन्नानां दक्षतानां व्यवस्थां कृत्वा स्वभूमिका निर्वोढा। एवं कुर्वन्तः ते सामग्रीभारसम्बद्धान् विषयान् अपि साधितवन्तः। तैः आधारभूतशिक्षणस्य विभिन्नस्तरेषु ज्ञानप्राप्तेः प्रक्रियायाः पुनः समयोजनं पुनर्निर्देशनं च कुर्वद्भिरेवं कृतम् अस्ति। बालमनोविज्ञानस्य विषये अधिकं ध्यानं दत्तं, भिन्न-भिन्न-व्वस्था-मध्ये शिक्षणाय, प्रशिक्षणाय च यः समयः उपलभ्यते, सः समयः च अस्य उद्देश्यस्य प्राप्त्यर्थं मनसि स्थापितोवर्त्तत।

© NCERT not to be republished

*बालवाटिकायाः* बालकानां कृते विकसितं एतत् क्रियाकलापपुस्तकं *एनईपी २०२०* (NEP 2020) इत्यस्य दृष्टिकोणानां पालनं कृत्वा विकसितम् अस्ति एवं च सरलतया, रोचकतया, आकर्षकरूपेण च योग्यताधृत-कार्यपत्राणि प्रदातुं प्रयत्नः कृतो वर्त्तते। अस्मिन् पुस्तके कलाशिल्पाः एकीकृताः सन्ति, येषां माध्यमेन शिक्षकाः बालकान् जागरूकान् कुर्वन्ति, एतादृशेषु कार्येषु निहितस्य सौन्दर्यस्य भावस्य प्रशंसां कर्तुं च प्रेरितान् कुर्वन्ति। एतत् क्रियाकलापपुस्तकं स्वसन्दर्भेषु अन्तर्निहितसंकल्पनानां सहजतया व्यवहारं कर्तुं परिस्थितिजागरूकतां अपि प्रददाति। एतत् क्रियाकलापपुस्तकं सारसमृद्धम् अस्ति; विविधानुभवं प्रदातुं, तथा च अन्यैः विविधैः क्रियाकलापैः सह क्रीडनक-क्रीडा-माध्यमेन शिक्षणस्य क्रीडा-मार्ग-पद्धतीनां एकीकरणेन, तथा च एतादृशैः प्रश्नैः ये बालकान् प्रेरयति यैः तेषां समीक्षात्मकचिन्तनस्य समस्यानिराकरणक्षमतानां च विकसो भवेत्। तदतिरिक्तं क्रियाकलापपुस्तके समृद्धाः विषयाः क्रियाकलापाः च सन्ति यैः बालकाः अस्माकं पर्यावरणस्य प्रति आवश्यकसंवेदनशीलतां विकसितुं साहाय्यं प्राप्नुयुः। तदतिरिक्तं, क्रियाकलापपुस्तके अस्माकं राज्यानां/केन्द्रशासित प्रदेशानां कृते अपि पर्याप्ता अवसराः प्रदत्ता सन्ति येषाम् *एनईपी २०२०* (NEP 2020) इत्यस्य शिक्षण-शिक्षणसामग्रीषु स्थानीयदृष्टिकोणैः सह अनुशंसानाम् अनुसारं विकासो सम्भवेत्।

एनसीईआरटी(NCERT) संस्था अस्य पाठ्यक्रमस्य आधारभूतचरणस्य कृते शिक्षण-शिक्षणसामग्रीविकासाय च स्थापितायाः अस्याः समित्याः परिश्रमस्य प्रशंसां करोति तथा च। अस्याः समितिस्य अध्यक्षा प्राध्यापिका शशि कला वञ्जरी इत्यादिभ्यः सर्वेभ्यः सदस्येभ्यः धन्यवादं ददामि यत् तैः एतत् कार्यं समये एवम् प्रशंसनीयरूपेण सम्पन्नतां नीतम्। अहं सर्वासु संस्थानां, सङ्गटनानां च कृतज्ञः अस्मि, यैः एतत् सम्भवं कर्तुं उदारतया स्वस्य साहाय्यं प्रदत्तम् | अहं तेषां यथासमयं बहुमूल्यं च सम्मर्शप्रदानाय विशेषतया राष्ट्रिय-सञ्चालन-समितेः अध्यक्षस्य डॉ. के कस्तूरिरङ्गनमहोदयं, शासि-समूहं, समीक्षा-समितिं च सममेव तस्याः अन्येषां सदस्यानं च प्रति विशेषतया आभारी अस्मि, , तेषां हि क्रियाकलाप-पुस्तकस्य अवधारणायाः विकासे च अपारं मूल्यम् अस्ति| भारते विद्यालयशिक्षायाः परिष्कारं कर्तुं प्रतिबद्धा एनसीईआरटी संस्था एतेषु पाठ्यपुस्तकेषु अधिकं परिष्कारं कर्तुं स्वस्य सर्वेषां हितधारकाणां समीक्षात्मकटिप्पणीनां परामर्शानां च प्रतीक्षां करिष्यति।

भारते विद्यालयशिक्षायाः परिष्कारं कर्तुं प्रतिबद्धा एनसीईआरटी संस्था एतेषु पाठ्यपुस्तकेषु अधिकं परिष्कारं कर्तुं स्वस्य सर्वेषां हितधारकाणां समीक्षात्मकटिप्पणीनां परामर्शानां च प्रतीक्षां करिष्यति।

27, जनवरी 2023
नवा दिल्ली

दिनेश प्रसाद सकलानी
निदेशकः, राष्ट्रियशैक्षिकानुसन्धानप्रशिक्षणपरिषद्

© NCERT not to be republished

# विकासदलम्

**परामर्शप्रदातारः-**

दिनेश प्रसाद सकलनी, *निदेशक*, एनसीईआरटी, नई दिल्ली

**मार्गदर्शनम्**

शशिकला वंजरी, *प्राक्तनोपकुलपतिः*, एसएनडीटी महिला- विश्वविद्यालय, मुम्बई, महाराष्ट्र, 1999।

*अध्यक्षा*, पाठ्यक्रमपाठ्यपुस्तकविकास समिति

सुनीति संवाल, *प्रमुख*, डीईई, एनसीईआरटी, *सदस्य संयोजक*, पाठ्यक्रम एवं पाठ्यपुस्तक विकाससमितिः

**योगदानकर्तारः**

भरत धोकाई, *निदेशकः*, विद्यापीठम् , गांधीधाम, गुजरात

दिव्यांशुभाईदवे, *महानिदेशकः उपकुलपतिश्च*, बालविश्वविद्यालयः, गांधीनगरम्, गुजरात,

रोमिला सोनी, *सहायकप्रोफेसर*, डीईई, एनसीईआरटी, नवा दिल्ली

Romila Soni, *Associate Professor*, DEE, NCERT, New Delhi

**समीक्षकाः**

अनूपराजपूतः, *प्रमुखः*, प्रकाशनप्रभागः, राष्ट्रियशैक्षिकानुसन्धानप्रशिक्षणपरिषद्, नवदिल्ली

भारतीकौशिकः, *सहायकप्रोफेसर प्रमुखा* च, DICT & TD, CIET, NCERT

जोबीबालकृष्णनः, *अवरप्राथमिकविद्यालयशिक्षकः*, मल्ली, अट्टापाडी, केरलम्.

ज्योत्सना तिवारी, *प्रमुखा*, लैंगिकाध्ययनविभागः, राष्ट्रियशैक्षिकानुसन्धानप्रशिक्षणपरिषद्, नवदिल्ली

के.मयूरी, *प्राध्यापिका* (सेवानिवृत्ता), मानवविकासपरिवाराध्ययनम्, सामुदायिकविज्ञानमहाविद्यालयः, पीजेटीएसएयू, हैदराबादम्

एम. सी. पन्तः, *प्राध्यापकः कुलपतिश्च*, एनआईईपीए, नवदिल्ली पद्मयादवः, प्रोफेसर, डीईई, राष्ट्रियशैक्षिकानुसन्धानप्रशिक्षणपरिषद्, नवदिल्ली

रञ्जनाअरोड़ा, *प्रमुखा*, पाठ्यक्रमअध्ययनविभागः, राष्ट्रियशैक्षिकानुसन्धानप्रशिक्षणपरिषद्

रीतासोनावतः, प्राक्तन *डीन*, गृहविज्ञानसङ्कायः, एसएनडीटी-महिला विश्वविद्यालयः, मुम्बई, महाराष्ट्रम्

**सदस्यसंयोजिका**

सुनीतिसंवालः, प्रमुखा, डीईई, राष्ट्रिय शैक्षिकानुसन्धान प्रशिक्षण परिषद्,, पाठ्यक्रम पाठ्य पुस्तक विकास समितिः

© NCERT not to be republished

# आभारप्रकाशनम्


राष्ट्रीयशैक्षिकानुसन्धानप्रशिक्षणपरिषद् (NCERT) अध्यक्षस्य तथा राष्ट्रियसञ्चालनसमितेः(NSC) सदस्यानां तथा शासिसमूहस्य सदस्यानां मार्गदर्शनं समर्थनं च कृतज्ञतापूर्वकं स्वीकरोति।

परिषदः अध्यक्षं तथा पाठ्यक्रमस्य एलटीएम समितेः सदस्येभ्यः च निरन्तरं समर्थनार्थं धन्यवादं व्याहरति।

परिषद् आनन्द — बालवाटिका कृते क्रियाकलापपुस्तकस्य विकासे सलवानपब्लिकस्कूलस्यगुरुग्रामस्य *पूर्वप्र मुखाध्यापिकायाः* मौश्मीबोसमहाभागायाः अथ च एचडीएफसीकनिष्ठविद्यालयगुरुग्रामस्य समन्वयिकायाः मोनिकासोढीमहाभागायः योगदानं साभारं स्वीकरोति।

परिषद् डीईई, राष्ट्रीयशैक्षिकानुसन्धानप्रशिक्षणपरिषदः *शैक्षणिकपरामर्शदात्र्याः* दीक्षादीवानमहाभागायाः, दिल्लीविश्वविद्यालयस्य पीएचडीविदुष्याः प्रशिशिक्ष्वाः अमनदीपकौरमहाभागायाः च क्रियाकलापपुस्तकाय अन्तिमरूपप्रदानाय प्रदत्तं समर्थनं साभारं स्वीकरोति।

परिषदः निम्नलिखितानां योगदानस्य कृते अपि धन्यवादं करोति— राजीवपहुजाः, *ग्राफिकडिजाइनरः* (स्वतन्त्रकर्मी); मोहम्मदरकीबः, *रङ्गकलाकारः* (स्वतन्त्रकर्मी); रुबीना अंसारी, *ग्राफिककलाकर्त्री* (स्वतन्त्रकर्मिणी); सायनाअंसारी, *पेन्सिलकलाकर्त्री* (स्वतन्त्रकर्मिणी); विवेकमण्डलः, *ग्राफिकडिजाइनर* (अनुबंधात्मकः) राष्ट्रीयशैक्षिकानुसन्धानप्रशिक्षणपरिषद्; चञ्चलरानी, *एलडीसी* (अनुबंधात्मिका) डीईई, राष्ट्रीयशैक्षिकानुसन्धानप्रशिक्षणपरिषद्; अभिषेकपाण्डेयः, टङ्ककः, (अनुबंधात्मकः) डीईई, राष्ट्रीयशैक्षिकानुसन्धानप्रशिक्षणपरिषद्, एवं पवन कुमार, *डीटीपी ऑपरेटर* (अनुबंधात्मकः) डीईई, राष्ट्रीयशैक्षिकानुसन्धानप्रशिक्षणपरिषद्।

राष्ट्रीयशैक्षिकानुसन्धानप्रशिक्षणपरिषदः प्रकाशनविभागस्य प्रयत्नाः अपि यथाविधि साभारं स्वीक्रियन्ते। परिषद् इल्मा नासिरस्य *सम्पादकस्य* (आनुबन्धिकस्य) ; कहकशा, *सहायकसम्पादकस्य* (अनुबंधात्मकस्य), तथा चञ्चलचौहानस्य, *सहायकसम्पादकस्य* (अनुबंधात्मकस्य) प्रतिलिपिसम्पादने बहुमूल्यं योगदानं चापि साभारं स्वीकरोति। राष्ट्रीयशैक्षिकानुसन्धानप्रशिक्षणपरिषदः सुरेन्द्र कुमारस्य, *(प्रभारिणः) डीटीपी सेल;* मसिहुद्दीन, *डीटीपी संचालकस्य* (अनुबंधात्मकस्य), सचिनतंवरस्य, *डीटीपी संचालकस्य* (अनुबंधात्मकस्य), संस्कृतानिवादकर्तुः शशिपालशर्मणः(स्वतन्त्रकर्मिणः) च प्रयत्ना अपि साभारं स्वीक्रियन्ते।


© NCERT not to be republished

# क्रियाकलाप-पुस्तकस्य विषये

आधारभूतचरणः, यस्मिन् ३ तः ८ वर्षाणां आयुवर्गस्य बालकाः समाविष्टाः सन्ति, तस्य महत्त्वं सर्वाधिकं भवति अथ च एषः एव अवधिः यदा व्यक्तेः जीवने अन्येभ्यः समयेभ्यः अपेक्षया युवमस्तिष्कस्य तीव्रगत्या विकासः भवति, स्वस्थमस्तिष्कस्य च विकासाय बालकानां विकासस्य सर्वेषां क्षेत्राणां आवश्यकतां पूरयन्तः सकारात्मकशिक्षणानुभवाः आवश्यकाः भवन्ति। सकारात्मकाः योजनाबद्धाः च अनुभवाः लघुबालानां भविष्ये शिक्षणस्य, तेषां स्वास्थ्यस्य, तेषां व्यवहारस्य, भविष्ये जीवने सफलतायाः च आधारं निर्मास्यन्ति। नित्यं क्रीडापूर्णानुभवाः बालस्य मस्तिष्कस्य आकारं ददति। *'आनन्द — बालवाटिकायाः क्रियाकलापपुस्तकम्'* इत्यस्मिन् दत्तानि अनुकरणीयकार्यपत्राणि (समग्रतः ९२) तदेव चित्रयन्ति।

अस्मिन् स्तरे बालकानां शिक्षणाय साहाय्यं प्रदातुं सर्वोत्तमः उपायः अस्ति यत् तेषां वयसः विकासस्तरस्य च अनुसारं 'सरलतः जटिलपर्यन्तं', 'परिचिततः अपरिचितपर्यन्तं', 'अमूर्तविचारेभ्यः साक्षादनुभवपर्यन्तम्' इत्याधारेण क्रीडा-आधारित-क्रियाकलापानाम् प्रस्तावो भवेत्। आयुषः विकासात्मकरूपेण च समुचितं क्रीडाधारितं क्रियाकलापं अनुभवं च प्रदातुं शिक्षकाणां प्रौढानां च भूमिका भवति। एते अनुभवाः वास्तविक, हस्तामलकवदनुभवरूपेण स्यात् यैः सह कार्यपत्रकाणि सहायकानु भवन्तु। उद्देश्यपूर्वकं योजनापूर्वकरचितानि कार्यपत्राणि बालकानां विभिन्नदक्षतानां अवगमनं प्राप्तुं तेषां आधारभूतकौशलं च सुदृढां कर्तुं साहाय्यं करिष्यन्ति।

कश्चिद् बालकः तदैव सर्वोत्तमरूपेण शिक्षते यदा शिक्षणे आनन्दः स्यात्, अतः किमपि कार्यं कुर्वद्भ्यः बालकेभ्यः स्वातन्त्र्यस्य आनम्यतायाश्च च प्रदानम् अतीव महत्त्वपूर्णम् अस्ति। *बालवाटिकायाः* कृते सुविकसितानि एकीकृतकार्यपत्राणि बालकेभ्यः अभ्यासस्य, चर्चायाः, कृत्वा शिक्षणस्य च माध्यमेन शिक्षितुं अवसरं ददति। एतत् पारम्परिकशिक्षक-नेतृत्वेन कक्षायाः अपेक्षया साक्षादनुभवानाम् उपयोगं (कार्यपत्राणां उपयोगात् पूर्वं) तथा स्थानीय-उपलब्ध-सामग्रीणां प्राकृतिक-संसाधनानाञ्च उपयोगं प्रवर्धयन्ति। एतानि कार्यपत्राणि बालकेभ्यः कक्षायां ज्ञातावधारणाभिः सह स्वस्य दृश्यस्मृतीनां संयोजनस्य अवसरं प्रदास्यन्ति अथ च पूर्वानुभवैः सह सम्बद्धतां कर्तुं शक्ष्यन्ति।

श्रेणी(ग्रेड-)स्तरस्य परिणामान् प्रदर्शयितुं विविधक्षमतायुक्तानां बालकानां कृते आनन्ददायकशिक्षणस्य अवसरान् प्रदातुं अनुकरणीयकार्यपत्राणि विकसितानि सन्ति। यथा नूतनशिक्षानीत्यां *(NEP 2020)* , शिक्षायाः ध्यानं केवलं सामग्रीं स्थानान्तरयितुं नैव अपितु योग्यतायाः विकासे एव भवेत्। नियमितरूपेण आधारभूतसाक्षरता, संख्याशास्त्रं च सह समीक्षात्मकचिन्तनस्य, समस्यानिराकरणस्य, सञ्चारकौशलस्य, सृजनशीलतायाः, सहानुभूतेः इत्यादीनां माध्यमेन बालानां मनसः पोषणं युगानुरूपा आवश्यकता अस्ति अथ च शिक्षण-शिक्षणसामग्रीणां परिकल्पने परिवर्तितदृष्टिकोणस्य आह्वानं क्रियते। *आधारभूतचरणस्य कृते राष्ट्रियपाठ्यक्रमरूपरेखा (NCF-FS 2022)* विकासस्य सर्वान् क्षेत्रान् समन्वयेन ग्रहीतुं महत् महत्त्वं ददाति अतः तस्यैव एकीकरणं मूलरूपेण स्थापितं अस्ति। 'पञ्चकोशाः' (यथा *एनसीएफ-एफएस* इत्यत्र उल्लिखितम्) बालकानां कृते शैक्षणिकसामग्रीणां दृश्यप्रतिमानां च रूपरेखां निर्मातुं केन्द्रे स्थापिता सन्ति, यैः शारीरिकविकासः *(अन्नमयकोशः),* जीवनशक्तिः *(प्राणमयकोशः),* भावनात्मकविकास *(मनोमयकोशः),* सञ्ज्ञानात्मकविकासः *(विज्ञानमयकोशः),* आनन्दः *(आनन्दमयकोशः),* इति सर्वेषां युगपत् ग्रहणं शक्यं स्यात्।

© NCERT not to be republished

एतानि कार्यपत्राणि बालकानां कृते विद्यालयसज्जतां प्रवर्धयिष्यन्ति तथा च सुनिश्चितं करिष्यन्ति यत् ते औपचारिकविद्यालयव्यवस्थायां प्रवेशार्थं मूलभूतभाषायाः आवश्यकानां संज्ञानात्मककौशलानां च विषये अवगताः स्युः। सुचारुसंक्रमणार्थं बालकैः पूर्वमेव कौशलस्य प्राप्तिः महत्त्वपूर्णा वर्त्तते, तद्धि तेषां वयसः अनुरूपं कार्यं कर्तुं सहायिका सेत्स्यति। एतानि कार्यपत्राणि बालकानां स्वस्थसुरक्षिताभ्यासानां विकासाय अभ्यासाय च, संवेदिधारणानां वर्धनाय, सौष्ठवसम्पन्नाम्यतायुक्तशरीरस्य निर्माणे, कलाभिश्च भावनात्मकबुद्धेः, तार्किकचिन्तनस्य, अभिव्यक्तेः च विकासे साहाय्यं करिष्यन्ति।

एतानि कार्यपत्राणि बालकानां सूक्ष्म-चालक-कौशलं, तार्किक-चिन्तनं, स्वयमेव विषयान् ज्ञातुं च साहाय्यं करिष्यन्ति। एतानि निदर्शनात्मकानि कार्यपत्राणि दक्षतासु आधारितानि सन्ति (यथा NCF-FS, 2022 इत्यस्मिन् प्रदत्ताः) अथ च एतेषु सम्मर्शप्रदविचाराः प्रश्नाः च सन्ति यान् कश्चित् शिक्षकः अथवा अभिभावकाः बालकान् तेषाम् अवगमनस्य आकलनाय प्रष्टुं शक्नुयुः।

कार्यपत्राणाम् उपयोगः केन विधिना करणीयः (शिक्षकेभ्यो वयस्केभ्यो वा)

- बालवाटिकायाः कृते कार्यपत्राणि (सर्वेषु पञ्चक्षेत्रेषु पोषणप्रदानि) एतादृशरीत्या परिकल्पितानि सन्ति यत् एतानि उपयोगाय सुलभतया पृथक्तया प्रयोक्तुं शक्यन्ते। कार्यपत्राणि क्रियाकलापपुस्तकात् निष्कास्य पश्चात् एकस्मिन् विभागे स्थापयितुं शक्यन्ते येन एतानि शिक्षकाणां अभिभावकानां वा कृते बालकार्यस्य आकलने अपि सहायकानि भविष्यन्ति। एतद्धि बालकेभ्यः कार्यं कर्तुं एकस्मिन् कार्यपत्रके ध्यानं च दातुं साहाय्यं सेत्स्यति इतरकार्यपत्रकक्रियाभिश्च ते विचलिताः न भविष्यन्ति।
- विभिन्नक्षेत्रेषु समग्रशिक्षणं सुनिश्चेतुं सदृशकार्यपत्रकाणि निर्मातुं शक्यन्ते।
- कार्यपत्राणि उदाहरणरूपेण ग्रहीतुं शक्यन्ते शिक्षकाश्च अवधारणानां आधारेण समधिकान् अभ्यासान् निर्मातुं शक्नुवन्ति। यथा हि - दत्ते कार्यपत्रके वस्तूनां संख्यां न्यूनीकरणं, भिन्नाकृतीनां च ग्रहणम् इत्यादिभिः परिवर्तनं कर्तुं शक्यते।
- स्थानीयसंसाधनानाम् सामग्रीनां च उपयोगः कर्तव्यः कार्यपत्रकाणां उपयोगाच्च पूर्वं यत्र सम्भवं तत्र प्रकृतेः अवधारणानां परिचयो दातव्यः, उदाहरणार्थं पत्रैः सह प्रतिमानं निर्मातुं, शुष्कपुष्पैः, शाखाखण्डैर्वा इत्यादिभिः सह *रङ्गोली* निर्माणम्।
- स्वक्षेत्रानुसारं वास्तविकं स्थूलपदार्थान्, कथाः, उदाहरणानि च उपयुज्य बालस्य जीवनेन सह सम्बद्धतां प्राप्तुं तानि सन्दर्भरूपेण स्थापनीयानि। यथा, लोककथाः, प्रादेशिकं छन्दो गीतं वा योजयित्वा, पशूनां विषये कार्यपत्रस्य साधनात् पूर्वं बालकाः स्वपरिवेशे जन्तुशालायां वा दृश्यमानानां पशूनां, स्वगृहे पालितप्राणिनाम् इत्यादीनां विषये प्रष्टव्याः, येन बालकाः स्वस्य साक्षादनुभवं शिक्षणेन सह सम्बद्धं कर्तुं शक्नुयुः।
- चर्चायाः समये वा कक्षायां प्रदर्शनं कुर्वतां बालकानाम् अवलोकनपूर्वकं शिक्षणस्य च अन्तरालानाम् अभिज्ञानपूर्वकं च सौविध्यप्रदानेन, कार्यपत्राणि बालकस्य क्रियाकलापस्य अन्ते बालस्य कार्यप्रदर्शनस्य आकलनं कर्तुं रचनात्मकरूपेण न तु औपचारिकरूपेण समग्ररूपेण मूल्याङ्कनं कर्तुं शिक्षकस्य सहायतां करिष्यन्ति।
- कार्यपत्रकाणां रचनायै सृजनशीलता स्वातन्त्र्यं च पोषणाये, अन्वेषणं, हस्तगतानुभवाः च एतदर्थम् अनुमन्यन्ते। बालकाः अवधारणाः परितः स्वविचारान् निर्मातुम् अर्हन्ति। प्रत्येकस्मै बालकाय स्वगत्या कार्यं कर्तुमनुमतिर्दातव्या।
- एकाम् अन्तःक्रियाशालिनीं कक्षां निर्माय सामाजिक-भावनात्मको विकासः प्रोन्नेतव्यः तथा च यथासम्भवं बालात्-बालं बालाच्च शिक्षकं अन्तःक्रियायाः प्रवर्धनं करणीयम्।

© NCERT not to be republished

- बालकानां कृते बालानुकूल-प्रशंसनीय-सकारात्मक-शब्दानां प्रयोगं कृत्वा ते दृश्यन्ते श्रूयन्ते चेति तेभ्योनुभवितुं दीयताम् , उदाहरणार्थं कक्षायाः भित्तिषु, *बालवाटिका*-कक्षानां *बहिरङ्गणे* वा इत्यादिषु स्थलेषु बालकैः निर्मितानि रेखाचित्राणां, कोलाज इति च चित्रमिश्राणां वा प्रस्तुतिः करणीया।
- विशेषावाश्यकतायुतबालानां कृते एतेषां कार्यपत्रकाणां विशेषप्रावधानं अनुकूलितसंस्करणं च सुनिश्चितं करणीयम्, उदाहरणार्थं, येषां बालानाम् लेखनसाधनानि धारयितुं समस्या भवति तेभ्यः प्रैषमुद्राणां प्रयोगं कर्तुं अनुमतिः दातव्या, दृष्टिबाधितबालानां कृते चित्राणां श्रव्यवर्णनं प्रदातव्यम् इत्यादयः।
- सकारात्मकाभ्यासान् विकसितुं बालकाः स्वस्य वस्तूनि निर्दिष्टस्थाने स्थापयितुं प्रोत्साहनीयाः। अपि च, कार्यपत्रकं पूर्णं कृत्वा प्रयुक्तानि वस्तूनि (रङ्गानि, तूलिकाः, खण्डाः इत्यादीनि) पुनः स्थापयितुं वदन्तु।
- एकस्मात् क्रियाकलापात् अन्यं प्रति संक्रमणकाले बालगीतानां पुनरावृत्तिः प्रवर्तनीया यदा च स सम्भवं स्यात् तदा समन्वयं शरीरस्य मार्दवं गतिं च सुनिश्चेतुं नृत्यक्रियाश्च समावेशनीयाः।

अत्र प्रदत्तानां कार्यपत्राणाम् उद्देश्यं शिक्षकेभ्यः अभिभावकेभ्यो वा केषाञ्चन अनुकरणीयविचाराणां प्रदानम् अस्ति, एतच्च कथमपि सम्पूर्णतया वा कार्यपुस्तिकारूपेण कार्यत्वेन सहायि नैवास्ति। बालकानां सन्दर्भस्य आवश्यकतायाः च आधारेण कार्यपत्रकस्य कल्पनां, योजयितुं, त्यक्तुं वा स्वतन्त्रता दीयते। एतैः कार्यपत्रैः क्रियाकलापेषु आनन्दस्य भावः सृष्टं भवेद् इति दृष्ट्या गृहस्य कक्षायाः च शब्दावलीनां मध्ये कश्चित् सम्बन्धः स्थापनीयः।

❄ ❄ ❄

© NCERT not to be republished




not to be republished © NCERT

# कार्यपत्रैः सह सहायता

कार्यपत्रकाणि सामादधतां बालकानां साहाय्यार्थं शिक्षकाणां कृते निम्नलिखितटिप्पण्यः सन्ति; तथापि बालकानाम् आवश्यकतानां रुचीनां च आधारेण एतासु परिवर्तनं भवितुम् अर्हति। प्रत्येकं कार्यपत्रकस्य परिधिः निश्चितरूपेण वा प्रतिमानेन वा अस्ति। एकदा बालकः कार्यपत्रकं सम्पन्नं करोति तदा बालकः तत्परिधौ प्रारूपं प्रतिमानं वा पूर्णं कर्तुं प्रोत्साहयितुं शक्यते।



### क्रियाकलापः 1: मम चित्रचतुष्कोणपरिधिः

बालकाः स्वस्य मुखस्य विभिन्नभागानाम् आरेखणं कर्तुं तेषु च रङ्गविधानं कर्तुं प्रोत्साहनीयाः। पश्चात् ते चित्रस्य क्रेयॉन् इतिरङ्गलेखनीनाम् उपयोगेन दत्तं प्रतिमानं पूर्तिं नीत्वा स्वचित्रस्य फ्रेम इति चतुष्कोणीयपरिधिं निर्मातुं वक्तव्याः।



### क्रियाकलापः 2: मम विषये सर्वम्!

बालकेभ्यः स्वस्य परिवारस्य विषये च वक्तुम् अवसरो दातव्यः। बालकाः प्रदत्ते स्थाने स्वपरिवारस्य छायाचित्रं स्थापयितुं प्रोक्तव्याः। ततः बालकाः स्वस्य रेखाङ्कनं कर्तुं प्रियं रङ्गं पूरयितुं वा प्रोत्साहनीयाः, प्रदत्ते स्थाने ते स्वस्य प्रियायाः आकृतेः आरेखणं कुर्वन्तु। बालाः साभिनयं 'मम वर्णनम्' आलक्ष्य बालगीतं गायन्तु।



### क्रियाकलापः 3: आत्म-बोधः

बालकाः परिवारस्य अङ्गभूताः सन्ति, प्रत्येकं सदस्यश्च स्वकुटुम्बे भिन्नां भूमिकां निर्वहति इति धारणामधिगन्तुं तेषां साहाय्यं करणीयम्,। बालकैः सह तेषां पारिवारिकमूल्यानां परम्पराणां च अनुसरणं कथं करणीयम् इति विषये चर्चा करणीयम्।



### क्रियाकलापः 4: मम परिवारो मम मित्राणि च

बालकाः चित्रं अवलोक्य तस्य विषये चर्चां कुर्वन्तु। यथा — "चित्रे किं भवति?" यदा बालकाः चित्रं अवलोकितवन्तः, तदा ते तस्य विषये विस्तरेण वदन्तु। ततः बालकेभ्यः पूर्वानुमानप्रश्नाः प्रष्टव्याः यथा— "किं त्वम् अपि मातापितृभ्यां सह कस्यचित् गृहं गच्छसि ? कस्यचित् गृहं गच्छन् कथं अभिनन्दसि। तुभ्यं कस्य गृहं गन्तुं अधिकं

© NCERT not to be republished

रोचते? यदि कश्चित् त्वां परिचयं दातुं पृच्छति तर्हि त्वं किं वदिष्यसि? 'बालिका अतिथिभ्यः किं वदति' इति त्वया विचार्यते?" इत्यादि। भवान् भिन्नविषयेषु समानं चित्रपठनस्फारितपत्रं सज्जीकर्तुं शक्नोति। चित्रपठनानन्तरं बालकाः अतिथिसङ्ख्यां, चित्रे कुलव्यक्तिसङ्ख्यां गणयितुं, वस्त्रस्य समानं प्रतिमानं च चिन्तयितुं प्रोक्तव्याः।

### क्रियाकलापः 5: सदृशं पदार्थम् अभिजानीहि



बालकाः प्रत्येकं पङ्क्तौ वस्तूनां अभिज्ञानं कृत्वा नामोच्चारणं कुर्वन्तु। ततः वामपेटिकायां प्रदत्तचित्रेण सङ्गतं चित्रं अन्विष्य तस्मिन् रङ्गलेपं कर्तुं वक्तव्यम्। बालकाः बिन्दुभिः रचितरेखासु समानरङ्गस्य उपयोगेन अनुकृत्यारेखणं कर्तुं प्रोक्तव्याः।

### क्रियाकलापः 6: खगः प्रपूरणीयः



कार्यपत्रे पक्षिणः आकृतिः अस्ति। बालकाः बिन्दून् संयोजयित्वा पक्षिणं सम्पूर्णं कृत्वा तस्मिन् रङ्गारोपणं कुर्वन्तु अथवा कर्गदात् आकृतिं विदीर्य तां श्लिष्टां कुर्वन्तु। 'पक्षी' इति शब्दस्य आरम्भिकध्वनिं वक्तुं प्रोत्साहयन्तु— (यथा शुकस्य कृते शु) तथा च तेषां परिसरे ते यान् सामान्यपक्षिणः पश्यन्ति तेषां नामोच्चारणं कर्तुं वक्तव्याः।

### क्रियाकलापः 7: मम पञ्चेन्द्रियाणि



बालकः प्रत्येकं पङ्क्तौ वस्तूनि अभिजानातु ततः दक्षिणमञ्जूषायां तेषाम् इन्द्रियाङ्गैः सह मेलनं करोतु। बालकः इन्द्रियाङ्गविषये वक्तुं , इन्द्रियाङ्गविषये गीतं गातुं वा प्रोत्साहनीयः।

### क्रियाकलापः 8: मम च विद्यालयस्य च स्वच्छता



स्वस्य परिवेशस्य च स्वच्छतायाः रक्षणं तथा महत्त्वपूर्णं यथा वयं कीटाणुरहिताः भवेम अस्मान् परितः सर्वं सुन्दरं दृश्यं भवेद्, इति अवगन्तुं बालकस्य साहाय्यं करणीयम्। कक्षायां विद्यालये च सर्वं कथं स्वच्छं व्यवस्थितं च भवेत् इति विषये बालकैः सह सम्भाषणं कुर्वन्तु। शरीरस्य, विद्यालयस्य च शोधनार्थं प्रयुक्तानि समुचितवस्तूनाम् उपरि दत्तेन चित्रद्वयेन सह सङ्गतिं बालः करोतु।

© NCERT not to be republished



## क्रियाकलापः 9: Animals and Birds Around Me

कक्षायां बालकैः सह 'मैं तो सो रही थी' इति गीतं गानीयम्। गीतान्तर्गतं पशूनां पक्षिणां च नाम्नां ध्वनीनां च संयोजनपूर्वकं गीतमग्रे प्रवर्तेत एवं बालकाः प्रोत्साहनीयः। पशूनां पक्षिणां वा फ्लैशकार्डपत्राणां काष्ठपुत्तलिकानां सुलभतया उपलब्धसामग्रीभिः निर्माणे बालकाः सम्मिलिताः करणीयाः, पशुफ्लैशकार्डपत्राणि काष्ठपुत्तलिकां वा उपयुज्य कथां वा गीतं वा ते निर्मातुम् अर्हन्ति।



## क्रियाकलापः 10: I Have Feelings

अस्माकं सर्वेषां भावनाः भवन्ति इति अवगन्तुं बालकस्य साहाय्यं कुर्वन्तु, परन्तु अस्माकं भावनाभिः सह सहनशीलतां धारणस्य शिक्षणम् आवश्यकं महत्त्वपूर्णम् च अस्ति। ततः बालकः समानाभिव्यक्तिभिः सह उचितमुखैः सह भावनानां सङ्गतिं कर्तुं प्रोक्तव्यः। केचन तादृशाः कार्यकलापाः कुर्वन्तु यैः तेषां भावनानां सामुख्यं कर्तुं शिक्षायं साहाय्यं भवेत्।



## क्रियाकलापः 11: स्वास्थ्यरक्षकानि खाद्यानि

स्वास्थ्यप्रदस्य अस्वास्थ्यकारकस्य च आहारस्य अभ्यासेषु चर्चां कुर्वन्तु। बालकाः प्रत्येकं खाद्यपदार्थम् अभिज्ञातुं नामोच्चारणं कर्तुं प्रोत्साहनीयाः। बालकाः प्रष्टव्याः यत् ते एकस्मिन् दिने बहुधा किं खादन्ति। ततः प्रत्येकं पङ्क्तौ स्वस्थभोजनं वृत्तेन परिधिगतं कर्तुं बालको वक्तव्यः।




## क्रियाकलापः 12: पशवो यथा मया ज्ञाताः

बालकाः स्वसमीपस्थान् यान् पशून् जानन्ति ये च तैः दृष्टाः तेषां विषये ते कथयन्तु। बालकः प्रत्येकं पशुम् अभिज्ञाय नाम चोक्त्वा तस्य ध्वनिं करोतु। ततः, बालकः प्रत्येकं पशौ तर्जनीं स्थापयित्वा तस्य नाम्नः आरम्भिकम् वर्णं वदेत्। पीतबिन्दुतः पशूनाम् अनुरेखणम् आरभ्य, बाणचिह्नम् अनुसृत्य रक्तबिन्दुं यावत् समाप्तुं वक्तव्यम्। बालकाः बिन्दुसंयोगं कुर्वन्तः पशूनां भोजनं समीक्षितुं प्रोत्साहयन्तु, सिंहाय किं खादितुम् रोचते इति चिन्तयन्तु।



## क्रियाकलापः 13: विषमं विज्ञाय पृथक्करणीयः

बालकाः प्रत्येकपङ्क्तौ चित्राणाम् अभिज्ञानं नामकथनं च कुर्वन्तु तथा च प्रत्येकं पङ्क्तौ विषमं बहिः कृत्वा ततः बिन्दुरेखाभिः अनुरेखणं कर्तुं वक्तव्याः।

© NCERT not to be republished



**क्रियाकलापः 14: बृहत् लघु वा वस्तु**

बालकाः बृहल्लघु-वस्तूनाम्, यथा बृहत्-लघु-छत्र-कन्दुकेत्यादीनां अभिज्ञानं कृत्वा नामकथनं कुर्वन्तु। ततः ते बृहत् वस्तु रक्तवर्णेन, लघु वस्तु च नीलवर्णेन आरेखयितुं प्रोत्साहनीयाः।



**क्रियाकलापः 15: आकृतिमेलनं क्रियताम्**

रेखास्थापनेन बालकाः आकृतीनाम् अभिज्ञानं कृत्वा मेलनं कर्तुं प्रोत्साहनीयाः। पश्चात् तेषां प्रियं रङ्गपत्रं विदार्य आकृतौ श्लेष्टुं वक्तव्यम्।




**क्रियाकलापः 16: मया ज्ञाताः पशवः**

बालकाः स्वसमीपस्थान् यान् पशून् जानन्ति ये च तैः दृष्टाः तेषां विषये कथयन्तु। बालकः प्रत्येकं पशुम् अभिज्ञाय नामकथनं कृत्वा सदृशान् ध्वनीन् करोतु। ततः, बालकः प्रत्येकं पशौ तर्जनीं स्थापयित्वा तस्य नाम्नः आरम्भिकम् अक्षरं वक्तुं वदतु। पीतबिन्दुतः पशूनां अनुसन्धानं आरभ्य, बाणचिह्नम् अनुसृत्य रक्तबिन्दौ समापयेत्। बालकाः बिन्दुसंयोगं कुर्वन्तः पशूनां भोजनं अवलोकयितुं प्रोत्साहनीयाः, सिंहाय किं खादितुम् रोचते इति ते चिन्तयन्तु।




**क्रियाकलापः 17: यद्-यत् मया क्रियते विद्यालयं गमनात् प्राक्**

बालकाः चित्राणि पश्यन्तु, चित्राणि च सम्यक् क्रमेण संख्याक्रमे स्थापयन्तु। प्रत्येकं चित्रे क्रियायाः वर्णनं कर्तुं तान् पृच्छन्तु। अन्तिमायां मञ्जूषायां स्वविद्यालयस्य चित्रणं कर्तुं तान् प्रोत्साहयन्तु। भवन्तः बालकान् प्रत्येकं चित्रं छोटयित्वा सम्यक् क्रमेण व्यवस्थां कृत्वा व्यवस्थायाः वर्णनं कर्तुं वक्तुं शक्नुवन्ति।



**क्रियाकलापः 18: मम प्रियो भोज्यपदार्थः**

बालकैः साभिनयं गीतगायनं कर्तुं साहाय्यं कुर्वन्तु। तेषां प्रियभोजनस्य विषये चर्चां कुर्वन्तु तथा च 'स्वस्थभोजनम्' इति विषये पूर्वं १८, १९ चेति कृताभ्यां कार्यपत्रकाभ्यां सह सम्बद्धं कुर्वन्तु। वनस्पतयः अस्मान् कथं साहाय्यं कुर्वन्ति, वनस्पतिभ्यः किं भोजनं प्राप्नुमः इत्यादि विषये चर्चां कुर्वन्तु।



**क्रियाकलापः 19: आकृतयः रङ्गयन्तु**

बालकान् प्रति कार्यपत्रं व्याख्यातव्यम्। निर्देशेषु यथा उक्तं तथा आकृतीः चिन्तयित्वा नामकथनं कृत्वा आकृतीनां रञ्जनं कर्तुं प्रोत्साहयन्तु। ते सर्वान् त्रिकोणान पीतवर्णेन, वर्गान् हरितवर्णेन, वृत्तानि नीलवर्णेन च रञ्जयन्तु।

© NCERT not to be republished



### क्रियाकलापः 20: सुरक्षितो वर्तस्व

सुरक्षिता असुरक्षिताः च परिस्थितीः अवगन्तुं बालकानां साहाय्यं कुर्वन्तु, एतादृश्यां परिस्थितौ तेषां किं कर्तव्यमिति चर्चां कुर्वन्तु। सावधानतापूर्वकं तान् न भयभीतान् कुर्वन्तु। प्रत्येकं बालकः आत्मानं विशेषं अनुभवतु, ते अवगच्छन्तु यत् तेषां सुरक्षितं रक्षितं च अनुभवितुं अधिकारः अस्ति। ते कथं स्वं सुरक्षितं स्थापयितुं शक्नुवन्ति इति अपि चर्चां कुर्वन्तु। तैः विविधाः हेल्पलाइन इति सहायतादूरभाषसङ्ख्याः ज्ञातव्याः। अस्मिन् कार्यपत्रके चित्राणि अवलोक्य ते चित्रानुसारं सुरक्षितम् असुरक्षितं चेति चिह्नीकर्तुं वदन्तु।



### क्रियाकलापः 21: ज्ञात्वा वृत्तपरिध्यन्तःकरणीयम्

बालकाः चित्रद्वयं अवलोकयन्तु। चित्रयोः भेदं ज्ञात्वा भेदं वृत्तपरिध्यन्तरे कर्तुं पृच्छन्तु। भवन्तः बालकानां कृते भिन्नविषयेषु समानानि कार्यपत्राणि सज्जीकर्तुं शक्नुवन्ति।



### क्रियाकलापः 22: आकृत्यभिज्ञानपूर्वकं आकृत्यां रञ्जनम्

बालकाः विभिन्नाकृतीः पश्यन्तु , आकृतिषु रङ्गान् पूरयन्तु च। तान् आकृतिं वर्णयितुं प्रोत्साहयन्तु यथा सेवफलम्- कदली- सेवफलम्- कदली पुनः सेवफलम् इत्यादि।



### क्रियाकलापः 23: आकृतिभिः रचय

कार्यपत्रकस्य उपरि कतिपया आकृतयः रेखाङ्किताः। एतासाम् आकृतीनां उपयोगेन बालकान् चित्राणि, पत्राङ्कनं प्रतिमानं वा निर्मातुं प्रोत्साहयन्तु। पश्चात् तान् स्वस्य प्रतिमानं, पत्राङ्कनम् आकृतिं वा वर्णयितुं वदन्तु।



### क्रियाकलापः 24: मम सृजनात्मकानि वृत्तानि

कार्यपत्रके षड् वृत्तानां आरेखणानि सन्ति, बालकाः च दत्तवृत्तेभ्यः यथारुचि किमपि निर्मातुं प्रोत्साहिताः स्युः। एकं वृत्तम् उदाहरणरूपेण दत्तम्।



### क्रियाकलापः 25: मम क्रीडनकानि (चित्रपठनम्)

बालकाः चित्रम् अवलोक्य तस्य विषये चर्चां कुर्वन्तु। भवान् चित्रमाधृत्य कामपि कथां रचयितुं शक्नोति। बालकान् क्रीडापदार्थानाम् अभिज्ञानं नामकथनं च कर्तुं, गणयितुं, तेषां क्रीडनकानां नामकरणं कर्तुं च वदन्तु, यैः सह ते क्रीडन्ति इत्यादि। प्रकृतौ तेषां परितः सुलभतया उपलब्धानां निःशुल्कसामग्रीणां वा सामग्रीनां वा उपयोगेन क्रीडनकस्य निर्माणे च तान् सम्मिलितं कुर्वन्तु।

© NCERT not to be republished

## क्रियाकलापः 26: मम चित्रमिश्रम्

बालकाः बालानुकूल-कर्तनी-प्रयोगेन पुरातन-पत्रिकाभ्यः/पत्रिकाभ्यः शरीर-विषाणुराहित्य-स्वच्छता-सम्बद्धानि स्वस्य प्रियचित्रं छोटयन्तु। एतानि दत्तमञ्जूषायां कोलाज इति चित्रमिश्ररूपेण संश्लेषयन्तु इति तान् वदन्तु। बालकान् स्वकीयेन प्रकारेण चित्रमिश्रस्य चित्राणां विषये कतिपयानि पङ्क्तीः लेखितुं प्रोत्साहयन्तु।



## क्रियाकलापः 27: माम् अभितः पशवः खगाश्च

कक्षायां बालकैः सह 'chirp-chirp says the bird' इति कवितां साभिनयं पठन्तु। बालकान् पशुपक्षिणां नामानि ध्वनीन् च योजयित्वा बालगीतानि निरन्तरं रचयितुं प्रोत्साहयन्तु। बालकान् पशूनां वा पक्षिणां वा फ्लैशकार्डपत्राणां काष्ठपुत्तलिकानां वा सुलभतया उपलब्धसामग्रीभिः निर्माणे तथा च पशुफ्लैशकार्डपत्रकैः काष्ठपुत्तलिकाभिः वा कथाः वा गीतानि वा निर्मातुम् सम्मिलितान् कुर्वन्तु।



## क्रियाकलापः 28: लयात्मकशब्दमेलनं कुरुत

बालकाः चित्राणि अवलोकयन्तु, तेषां नामकथनं कुर्वन्तु, रेखाचित्रणं कृत्वा परस्परं अन्तिमाक्षरसाम्येन गीतरचनां कुर्वन्तः चित्राणां नाम्नां मेलनं कुर्वन्तु।



## क्रियाकलापः 29: वर्णान्तसाम्यशब्दाः

बालकाः चित्राणाम् अवलोकनं कृत्वा नामकरणं कुर्वन्तु चर्चां च कुर्वन्तु यत् तेषां नामानि परस्परं कथं वर्णान्तसाम्यं दधति— फल-नल, जग-टब इत्यादयः। चित्राणां नाम वर्णान्तसाम्ययुक्तं भवति चेत् प्रसन्नमुखाङ्कनेन वर्णयितुं वदन्तु तथा च यदि तानि वर्णान्तसाम्ययुक्तानि न सन्ति तर्हि विषण्णमुखाङ्कनेन वर्णयन्तु।.



## क्रियाकलापः 30: पदार्थानां गणना (सङ्ख्या 1–10)

बालकाः पदार्थानां सङ्ख्यां अवलोक्य गणयन्तु, प्रत्येकस्मिन् मञ्जूषायां यथा निर्देशितं तथैव सङ्ख्यानुसारं पदार्थं परितः वृत्तपरिधिं कुर्वन्तु, यथा, '१० *रोटिकाः* परिवेष्टय — इत्युक्ते बालकः केवलं १० *रोटिकाः* परितः एव वृत्तं कर्तुं अपेक्षितः इत्यादि।



## क्रियाकलापः 31: चक्रव्यूहः

बालकाः तर्जन्या चक्रव्यूहस्य/कुटिलमार्गस्य अनुसन्धानं कुर्वन्तु, स्वगावं सियायाः गोशालां नेतुम् अपि साहाय्यं कुर्वन्तु। ततः ते प्रोक्तव्याः यत् ते स्थूलरङ्गलेखन्या उपयोगेन चक्रव्यूहे रेखया अनुसन्धानं कृत्वा आरेखयन्तु सियायाः सहायतां च कुर्वन्तु यत् सा स्वगावं गोशालां नेतुं समर्था भवेत्।

© NCERT not to be republished



### क्रियाकलापः 32: बृहत्तमो लघुतमश्च

बालकान् बृहत्तमे पदार्थे रक्तवर्णीयं कर्गदं, लघुतमे च पदार्थे पीतवर्णीयं कर्गदं कर्त्तयित्वा संश्लेष्टुम् वदन्तु।



### क्रियाकलापः 33: प्रतिमानम् अनुसर

बालकाः प्रतिमानं पश्यन्तु, तद् वर्णयन्तु, दत्ते रिक्तस्थाने समानं प्रतिरूपं अनुसरन्तु।



### क्रियाकलापः 34 , 35 च : आलिख्य समुचितसङ्ख्याम् अधिगच्छ

बालकाः गणयन्तु, अङ्गुल्या मार्गस्य अनुरेखणस्य च अभ्यासं कुर्वन्तु। ततः दत्तमार्गे रेखाम् आलिख्य सम्यक् वृत्तसङ्ख्यायाः सह मेलनं कुर्वन्तु।



### क्रियाकलापः 36: कृमिप्रपूरणम्

प्रत्येकं पङ्क्तौ कैटरपिलर इति कृमिं पूर्णं कर्तुं बालकाः अपेक्षितसङ्ख्यायां वृत्तानि रचयन्तु। अभ्यासार्थं वयं सदृशं कार्यपत्रकं प्रदातुं शक्नुमः, यथा रेलयाने अपेक्षितसङ्ख्यायाम् उपयानानि समायोज्यन्ते, इत्यादिविधिना।



### क्रियाकलापः 37: सिंहो मूषकश्च

कथापत्रकाणि दर्शयित्वा बालकान् कथां कथयन्तु। प्रश्नान् पृच्छन्तु यथा — एषा कथा कस्य विषये अस्ति ? कथा कुत्र अभवत् ? कथायां का समस्या आसीत् ? चित्रेषु भवन्तः कान् पशून् पश्यन्ति ? कथायां भवद्भ्यः किं रोचते ? कथायाः अन्यत् शीर्षकं दातुं शक्नुवन्ति वा ? ततः तान् प्रोत्साहयन्तु यत् ते कथापत्राणि बिन्दुरेखाभिः (बाल-अनुकूल-कर्तनी-प्रयोगेन) छित्त्वा सम्यक् क्रमेण व्यवस्थित्य स्वशब्देषु कथां पुनः कथयन्तु।



### क्रियाकलापः 38: व्याधः कपोताश्च

बालकाः कथापत्राणि पठित्वा चर्चां कुर्वन्तु — "कथा कस्मिन् विषये अस्ति? कथा कुत्र अभवत् ? कथायां का समस्या आसीत् ? जालात् बहिः गन्तुं पक्षिणः किं कृतवन्तः? कथापत्रेषु कः पक्षी दर्शितः ? अन्येषां तेषां पक्षिणां नामकथनं कुर्वन्तु यान् भवन्तः स्वपरिवेशे पश्यन्ति इत्यादिप्रश्नैः।

© NCERT not to be republished

ततः बालकान् प्रत्येकस्मिन् कथापत्रे कपोतानां संख्यां गणयितुं वदन्तु। बालकान् कथापत्राणि बिन्दुरेखाभिः (बालानुकूलकर्तन्या उपयोगेन) छित्त्वा कथापत्राणि सम्यक् क्रमेण व्यवस्थित्य स्वशब्देषु कथां पुनः कथयितुं प्रोत्साहयन्तु। पश्चात् बालकेभ्यः 'एक चिड़ा अनेक चिड़ियाँ' इति लोकप्रियगीतस्य परिचयो दीयताम्।



### क्रियाकलापः 39: सर्वथा उचिताकारः

बालकः चित्राणि तेषाम् आकारानुसारं ‘बृहत्’, ‘मध्यम’, ‘लघु’ इति चिनोतु, नामचिटिकारोपणं च करोतु। भवान् दत्तचित्रेषु कथां निर्मातुम् अर्हति अथवा बालकान् तादृशीं कथां निर्मातुम् कथयतु यस्यां ते गणितीयशब्दकोशस्य उपयोगं कुर्वन्तु, यथा बृहत्-बृहत्तरं-बृहत्तमं, लघु-लघुतरं-लघुतमम् इत्यादि। ततः बालानुकूल-कर्तनी-प्रयोगेण बालकाः बिन्दु-रेखाभिः चित्राणि छित्त्वा समुचितस्थाने संश्लेषयन्तु, यथा मध्यम-पुत्तलिकायाः अधः मध्यम-पात्रस्य संश्लेषणम् इत्यादिक्रमेण।



### क्रियाकलापः 40: बृहल्लघु च

बालकाः दत्ते रिक्तस्थाने बृहत् लघु वा आकारं (पुराणपत्रिकाभ्यः वा वृत्तपत्रेभ्यः वा कर्तितानि) संश्लेषयन्तु इति ते प्रोक्तव्याः।



### क्रियाकलापः 41: रक्तदुर्गः

स्वातन्त्र्यदिवसस्य विषये चर्चां कुर्वन्तु — अस्माकं राष्ट्रियपर्वणः महत्त्वमालक्ष्य च। ततो बालकः राष्ट्रध्वजं रक्तदुर्गं च वर्णयतु।



### क्रियाकलापः 42: अपरेषु दयाभावः

वृत्तसमयमालक्ष्य चर्चां कुर्वन्तु, पशूनां प्रति सदैव कथमस्माभिः व्यवहारः कर्तव्यः इति विषये चर्चां कुर्वन्तु। अस्माभिः स्वकर्मसु दयालुभिर्भाव्यम्। बालाः साभिनयं कविताः पठन्तु। पशूनां विषये कथां उच्चैः पठन्तु। बालकान् कर्गदस्य ‘मत्स्यं’ निर्मातुं साहाय्यं कुर्वन्तु तथा च दत्ते स्थाने मत्स्यं ते संश्लेषयन्तु। मत्स्यारेखणम् अपि कर्तुं ते शक्नुवन्ति।



सेवफलम्

### क्रियाकलापः 43: स्वास्थ्यप्रदानि भोज्यानि

स्वास्थ्यप्रदस्य स्वास्थ्यहानिकरस्य च आहारस्य अभ्यासान् आलक्ष्य चर्चां कुर्वन्तु। बालकान् प्रत्येकं खाद्यपदार्थं चिन्तयित्वा नामकथनं कर्तुं प्रोत्साहयन्तु। बालकान् पृच्छन्तु यत् ते एकस्मिन् दिने बहुधा किं खादन्ति। ततः बालकं प्रत्येकं पङ्क्तौ स्वास्थ्यप्रदस्यभोजनं वृत्तपरिधौ कर्तुं वदन्तु।

© NCERT not to be republished



## क्रियाकलापः 44 and 45: At the Playground (चित्रपठनम्)

बालकाः क्रीडाङ्गणस्य चित्रं दृष्ट्वा तस्मिन् किं भवति इत्यालक्ष्य चर्चा करणीया। सृजनात्मकाः समीक्षात्मकचिन्तनप्रश्नाः प्रष्टव्याः, कार्यपत्रके केचन उदाहरणानि दत्तानि सन्ति। बालकान् समीपस्थं उद्यानं नीत्वा निःशुल्कं बहिः क्रीडां आनन्दग्रहणावसरो दातव्यः। पतितपत्राणि, पुष्पाणि इत्यादीनि संग्रहीतुं वक्तव्यं, कक्षायां क्रमणं, प्रतिरूपनिर्माणं च कृत्वा प्रदर्शन-कथन-क्रियाकलापादीन् कुर्वन्तु इति कथनीयम्। पश्चात् बालकाः तैः प्राप्तानां वस्तूनाम् अथवा संग्रहाणां उपयोगं कृत्वा कोलाज इति मिश्रचित्रणं रचयित्वा पत्रमुद्रणं, पुष्पमुद्रणं, इत्यादीनि कुर्वन्तु।.



## क्रियाकलापः 46: मम 10 गुब्बाराक्रीडनकानि

मीनायाः रवेश्च विषये कथां रचयतु। बालकान् कथयतु यत् एकदा उभौ कथं विविधरङ्गैः गुब्बारा इति क्रीडनकैः क्रीडितुम् इच्छतः आस्ताम्। बालकाः कथायां स्वकल्पनां योजयन्तु, कथायै शीर्षकं च ददतु। ततः तान् गुब्बाराक्रीडनकानि गणयितुं वदन्तु, तेषु रङ्गलेपनं कुर्वन्तु, ततः प्रत्येकं क्रीडनकेन सह एकं सूत्रं योजयित्वा प्रथमक्रीडनकगुच्छं मीनाहस्ते द्वितीयं क्रीडनकगुच्छं च रवेर्हस्ते संयोजयन्तु। अन्ते तान् समग्रक्रीडनकानां सङ्ख्यां गणयित्वा मञ्जूषायां लेखनायऽ वदन्तु।.



## क्रियाकलापः 47: गणय रञ्जय च

बालकः रेलयानस्य उपयानानां सङ्ख्यां गणयितुं प्रत्येकं सङ्ख्यायै प्रदत्तरङ्गानुसारं रञ्जयितुं च वक्तव्यः। संख्यासु गीतमेकं ते गायन्तु। बालकाः रिक्तानां माचिसमञ्जूषानां वा खाद्यपात्राणां वा (अथवा अन्यत् किमपि सुलभतया उपलब्धस्य वस्तुनः, यस्य मूल्यं नास्ति) संगृह्य सामग्रीसहितं लघुरेलयानं निर्माणं कुर्वन्तु एतदर्थं तेषां मार्गदर्शनं करणीयम्। समूहेषु कार्यं कुर्वन्तः बालकाः कथं परस्परं वार्तालापं कुर्वन्ति, स्वसामग्र्याः च आदानप्रदानं वा कुर्वन्ति इति अवलोकयन्तु। तैः विषयेऽस्मिन् एवं चर्चा कर्तव्या— भवता कदापि रेलयात्रा कृता वा ? कुत्र गतवाने ? अन्ये के के परिवहनसाधनानि भवता दृष्टानि ? किं भवता यात्रायाम् आनन्दो लभ्यते?.

अत्र आरेखयन्तु

## क्रियाकलापः 48: अहम् आत्मानं स्वच्छं करोमि

बालाः वदन्तु यत् तैः शरीरस्य शुद्ध्यर्थं कानि वस्तूनि प्रयुज्यन्ते। मञ्जूषायां दत्तनिर्देशानुसारं समुचितवस्तूनां चित्रणं रञ्जयितुं च प्रोत्साहनीयाः।

© NCERT not to be republished



## क्रियाकलापः 49: मार्गसुरक्षा (चित्रपठनम्)

